# वैदिकाग्निस्वरूपनिरूपणम्

देवज्योति-कुण्डु
शोधच्छात्रः, वैदिकदर्शनविभाग
संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशी-हिन्दू-विश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः

**शोधसंक्षेपः**

वयं सर्वेऽपि जानीमो यद् वेदे अनेकेषां देवतानां स्तुतयो विद्यन्ते इति। तेषु देवेषु अन्यतमोऽग्निः। लोके तु अग्निस्वरूपं वयं सम्यक्तया एवावगच्छामः। किन्तु तस्य विषये कीदृशी स्तुतिः विधीयते, किमर्थं स स्तुत्यः, किं च तस्य स्वरूपमिति वेदे प्राप्यते। अग्निर्हि बहुप्रसिद्धो देवः। ऋग्वेदे प्रायः द्विशतसूक्तेषु अग्नेः स्तुतिः समुपलभ्यते। ऋग्वेदस्य प्रथमं सूक्तमेव अग्निसूक्तम्। साधारणतया अग्निः हवेः वाहकत्वेन ज्ञायते। किन्तु एतत्स्वरूपं विहायापि अग्नेः महत्त्वं बहुषु क्षेत्रेषु विद्यते। अग्निसूक्ते अग्निविषये बहुधा वर्णितम्। सायणाचार्योऽपि तद्रचितभाष्ये अग्निशब्दस्य निर्वचनं, अग्निदेवतायाः विशेषणम्, अग्नेः यथार्थस्वरूपमित्यादिविषये विस्तरेण प्रतिपादितवान्। अपि च निरुक्तकारो यास्कोऽपि अग्निविषये सम्यक् चर्चां विहितवान्। अग्निसूक्तं विहाय अन्यान्यसूक्तेष्वपि अग्नेरुल्लेखः प्राप्यते। तस्मादपि अग्निस्वरूपमवगन्तुं शक्यते। वस्तुतो वैदिकसिद्धान्तानुसारमग्निदेवः कीदृशो भवतीत्यत्र विषयः। अस्मिन् विषये एवात्र विस्तरेण विचारा उपस्थापिताः।

**कूटशब्दाः** अग्निः, देवता, अग्निसूक्तम्, वेदः, निर्वचनम्, स्वरूपम्, निरुक्तम्, सायणभाष्यम्।

**उपक्रमः**

वेदोऽखिलधर्ममूलम्। जगति चत्वारो वेदाः सन्ति। ते भवन्ति – ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। चतुर्षु च तेषु वेदेषु ऋग्वेदः प्राचीनतमः। ऋग्वेदस्य प्रथमं सूक्तमस्ति अग्निसूक्तम्। जगति उपलभ्यमानस्य साहित्यस्येदं प्राचीनतमं सूक्तम्। अग्नेरत्र स्तुतिर्विहिता। वेदेऽग्निः बहुप्रसिद्धो देवः। ऋग्वेदे प्रायः द्विशतसूक्तेषु अग्नेः स्तुतिः समुपलभ्यते। ऋग्वेदस्य प्रथमपदमपि “अग्निम्”[1] इति। अग्निमित्यादिसूक्तं नवर्चम्। अग्निसूक्तस्य मधुच्छन्दा ऋषिः, गायत्री-छन्दः, अग्निश्च देवता। यो देवो यज्ञे प्रदत्तं हविः देवतानां कृते आदाय गच्छति सोऽग्निः। ऋग्वेदे त्रिषु प्रमुख्यदेवेषु अग्नेः स्थानं द्वितीयम्। मानवजीवनेन सह दृढतयाग्नेः सम्बन्धोऽस्ति। सम्पूर्णगृहकार्यायाग्नेः महती आवश्यकता विद्यते। प्रतिगृहमस्य निवासः। अग्निर्हि एवं देवो यो जन्मन आरभ्य मृत्युपर्यन्तं जनेन सहैव तिष्ठति। अग्निना एव सम्पूर्णसंसारस्य प्रकाशः जातः। अग्निरेव प्राचीनानाम् ऋषीणां प्रधान आसीत्। यतो हि अग्निना एव यज्ञो भोजनादिकं शीतनिवारणं च सम्पाद्यन्ते स्म। अग्निसूक्ते एतादृशस्याग्नेरेव स्तुतिर्विहिता।

`सायणाचार्योऽग्निसूक्तस्योपरि भाष्यमरचयत्। तद्भाष्यं सायणभाष्यमिति नाम्ना ज्ञायते। अग्निसूक्तस्य अग्निशब्दस्य निर्वचनसमये सायणाचार्यः तद्भाष्ये बहुविचारं कृतवान्। अन्येषामाचार्याणां मतेन अग्निशब्दः कथं तात्पर्यं निर्वहति इत्युक्त्वा व्याकरणप्रक्रिययापि अग्निशब्दनिर्वचनं प्रदर्शितम्। सम्पूर्णेऽपि अग्निसूक्ते अग्नेर्स्तुतिर्विहिता।

**अग्निशब्दस्य निर्वचनम्**

अग्निसूक्तस्य व्याख्यानसमये भाष्यकारः सायणाचार्योऽनेकेषां मतानुसारम् अग्निशब्दस्य निर्वचनं प्रदर्शितवान्। अग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति–"यथा अग्रणीर्भवति"[2]।अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अक्नोपनो भवतीति स्थौलाष्ठीविः, न क्नोपयति न स्नेहयति। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। तथा च ब्राह्मणान्तरम् – "अग्निर्देवानां सेनानीः" इति। एतदेवाभिप्रेत्य बह्वृचामन्त्रब्राह्मणे आमनन्ति –"अग्निर्मुखं प्रथमो देवतानाम्"[3] इति। "अग्निर्वै देवानामवमः"[4] इति ब्राह्मणम्। तथा तैत्तिरीयश्चामनन्ति –"अग्निरग्रे प्रथमो देवतानाम्"[5] इति, "अग्निरवमो देवतानाम्" इति च। वाजसनेयस्तु एवमामनन्ति –"स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम" इति।

शाकपूणिनामको निरुक्तकारः धातुत्रयाद् अग्निशब्दनिष्पत्तिं मन्यते। इतः 'इण् गतौ' इति धातुः। अक्तः 'अञ्जूव्यक्तिम्रक्षणक्रान्तिगतिषु' इति धातुः। दग्घः 'दह भस्मीकरणे' इति धातुः। नीतः 'णीञ् प्रापणे' इति धातुः। सायणाचार्यः प्रक्रियामिमामेवं वर्णयति – "अग्निशब्दो हि अकारगकारनिशब्दानपेक्षमाणः एतिधातोरुत्पन्नाद् अयनशब्दाद् अकारमादत्ते। अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते। नीः इति नयति धातुः। स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वा अग्निशब्दो भवति। यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविष्पाके च प्रेरयतीति समुदायार्थः" इति। एवमत्र केषाञ्चन आचार्याणां नये अग्निशब्दस्य निर्वचनमुक्तम्।

अग्निशब्दस्य व्याकरणप्रक्रियाविषयेऽपि सायणाचार्यः सम्यग् व्याख्यातवान्। अग्निशब्दे 'अग् कुटिलायां गतौ' इति धातुः।तस्य गत्यर्थत्वात् "अङ्गेर्नलोपश्च"[6] इति औणादिकसूत्रेण निप्रत्ययः। धातोः इदित्वात् "इदितो नुम् धातोः"[7] इति सूत्रेण नुमागमो भवति। तन्नकारस्य लोपो जायते। अङ्गति स्वर्गे गच्छति हविर्नेतुमित्यग्निः। तत्र "धातोः"[8] इति सूत्रेण अग्निशब्दस्याकार उदात्तः। "आद्युदात्तश्च"[9] इति सूत्रेण प्रत्ययगत इकारोऽपि उदात्तः। अधुना "अनुदात्तं पदमेकवर्जम्"[10] इति सूत्रमायाति। पदे यदि कश्चन उदात्तः स्वरितो वा स्वरस्तिष्ठति, तर्हि तं स्वरं विहाय पदे विद्यमाना अन्ये स्वरा अनुदात्ताः भवन्ति इति सूत्रस्याशयः। तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते। "सति शिष्टस्वरो बलीयान्"[11] इति हि न्यायः। ततोऽन्तोदात्तमग्निप्रातिपदिकम्। "किषोऽन्त उदात्तः"[12] इति फिट्सूत्रानुसारेणापि अग्निशब्दोऽन्तोदात्तः। "अनुदात्तौ सुप्पितौ"[13] इति अममित्येतद् द्वितीयैकवचनमनुदात्तम्। तस्य "अमि पूर्वः"[14] इति यत्पूर्वपदं तदुदात्तम् "एकादेश उदात्तेनोदात्तः"[15] इति सूत्रितत्वात्। एषा व्याकरणप्रक्रिया अग्निशब्दनिर्वचनस्य।

एवमन्यमतानुसारमपि सायणाचार्यः प्रदर्शयति – "स्थौलाष्ठीविरक्षरसाम्यान्निर्वक्ति। अक्नोपनशब्दस्यादौ निषेधार्थमकाररूपमक्षरं विद्यते। अग्निशब्दस्याप्यादावकारोऽस्ति। तदिदमक्षरसाम्यम्। शाकपूणिस्तु वर्णसाम्यात् निर्ब्रूते – दग्धशब्दाग्निशब्दयोर्गकारवर्णेन साम्यम्"[16] इति। एवं बहुधा अग्निशब्दस्य निर्वचनं सम्भवति। तत्समासेन सायणभाष्यानुसारं संक्षेपेण वर्णितम्।

**अग्निस्वरूपम्**

वेदेऽग्निः बहुप्रसिद्धो देवः। ऋग्वेदे प्रायः द्विशतसूक्तेषु अग्नेः स्तुतिर्समुपलभ्यते। मानवजीवनेनाप्यग्नेः दृढतया सम्बन्धोऽस्ति। अग्निं विना जनजीवनं न चलतीति लोकप्रसिद्धम्। अन्यान्यप्रयोजनीयवस्तु इव अग्निरप्यन्यतमः। अग्नेः प्रकाशकत्वं खलु बहुप्रसिद्धम्। ऋग्वेदस्याग्निसूक्ते अग्नेः स्तुतिर्विहिता। अग्निर्दूतः। यज्ञे प्रदत्तहविः स देवान् प्रति नयति। अग्निसूक्ते विविधमन्त्रैरग्नेः स्वरूपं सुवर्णितम्।

सर्वासु वैदिकदेवतासु अग्निरेव पवित्रतमा देवता। अग्निसूक्तं विहाय अन्येष्वपि सूक्तेषु अन्याभिः देवताभिः सह अग्निरपि स्तूयते। यद्यपि गुरुत्वदृष्ट्या इन्द्रात्परमेवाग्नेः स्थानं, तथापि यज्ञप्राधान्याद् वेदस्य प्रत्येकमण्डलारम्भे स सम्बोधनविषयतामेति। वेदे द्यावापृथिवी इत्येकं बहुचर्चितं देवतायुगलम्। अनयोः पुत्रत्वेन परिकल्पितोऽग्निः पृथिव्यामवतिष्ठते। अत एव वैदिकशब्दानां व्युत्पत्तिप्रदर्शने प्रवृत्तो निरुक्तकारः सर्वप्रथममग्निं व्याख्यातुकाम आह –"अग्निं पृथिवीस्थानस्थं प्रथमं व्याख्यास्यामः"[17] इति। अनेन पृथिवीस्थिता इयं देवता देवतानां प्रथमा इति सुस्पष्टं भासते। वेदसंहितासु सर्वपुरातनत्वेन ऐतिहासिकैः समर्थिता अग्निसूक्तादेवारभ्यते। तथाहि तत्राम्नातम् –

"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥"[18] इति।

अर्थाद् यज्ञस्य प्रकाशयुक्तः पुरोहितोऽग्निरस्ति। अथवा यजमानस्य सम्मुखेऽग्निः स्थितः। स देवान् यज्ञे आह्वयति। सर्वाधिकरत्नानि स धारयति। एवं योऽग्निः, तमहं स्तौमि इति। गीतिप्रधानस्य सामवेदस्यापि "अग्न आयाहि वीतये"[19] इति अग्नेः आह्वानपर आरम्भो लभ्यते। "अग्निर्वै प्रथमो देवतानाम्", "अग्निर्वै देवानामवमः" इत्यादीनि ब्राह्मणवाक्यानि देवतासु अग्नेः प्राथम्यं निःसन्देहं प्रकटयन्ति।

अग्निनामकं देवम् ईळे स्तौमि। 'ईड् स्तुतौ' इति धातुः। डकारस्य ळकारो बह्वृचाध्येतृसम्प्रदायप्राप्तः। तथा च पठ्यते –"अज्मध्यस्थडकारस्य ळकारं बह्वृचा जगुः। अज्मध्यस्थढकारस्य ळ्हकारं वै यथाक्रमम्" इति। मन्त्रस्य होत्रा प्रयोज्यत्वात् अहं होता स्तौमि इति लभ्यते। कीदृशमग्निम्? यज्ञस्य पुरोहितम्। यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति, तथा अग्निरपि यज्ञस्य अपेक्षितं होमं सम्पादयति। यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेण अवतिष्ठति अग्निः। कीदृशमग्निमित्युच्यते – होतारम् ऋत्विजम् इति। देवानां यज्ञेषु होतृनामकः ऋत्विक् अग्निरेव। तथा च श्रूयते –"अग्निर्वै देवानां होता"[20]इति। पुनरपि कीदृशम्? रत्नधातमं यागफलरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं वा।एतिधातोः उत्पन्नादयनशब्दाद् अकारमादाय, दहतेर्दग्धशब्दात् गकारं गृहीत्वा यद्वा अनक्तिधातोः ककारं गकारे परिवर्त्य, नयतेर्नीः ह्रस्वो भूत्वा परो भवति। इत्थं धातुत्रयेण निष्पद्यते अग्निशब्दः। यद्वा – अगिधातोः निप्रत्यये नलोपे अग्निशब्दः सिध्यति। पुर-इत्युपपदाद् दधातेः क्तप्रत्यये कृते धातोः हिरादेशे पुरोहितेति शब्दः जायते। रत्नोपपदधाधातोः क्विपि निष्पन्नाद् रत्नधा शब्दात्तमप्प्रत्यये रत्नधातमम् इति रूपम्। यज्ञस्य इत्यत्र यज्धातोः नङ्प्रत्यये षष्ठ्यन्तं रूपम्। अहम् अग्निनामकस्य देवस्य स्तुतिं करोमीति तात्पर्यार्थः। सोऽग्निः यज्ञस्य पुरोहितः। अर्थाद् यथा राज्ञः पुरोहितः तस्याभीष्टं पूरयति, तथैवाग्निः यज्ञद्वारा यजमानस्य कामनाः पूरयति। सोऽग्निः पुनः दानादिगुणयुक्तः। स यज्ञस्य होतापि भवति। पुनश्च यागरूपफलरूपाणां

रत्नानामतिशयेन धारयितास्ति अयमग्निः। अतः तादृशमग्निं रत्नधातमं स्तौमि इत्यभिप्रायः।

अग्निः प्राचीनैः नूतनैश्च ऋषिभिः स्तुत्यः। स देवान् यज्ञे आह्वयति। तथा ह्युच्यते –

"अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥"[21] इति।

अर्थाद् अयमग्निः पूर्वेभिः पुरातनैः भृग्वङ्गिरःप्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यः, नूतनैः उत इदानीन्तनैः अस्माभिरपि स्तुत्यः। सोऽग्निः सन् इह यज्ञे देवान् हविर्भुजः आ वक्ष्यतीति। अत्र उत-शब्दस्य विकल्पोऽर्थः। तथापि अत्र चार्थः अर्थात् समुच्चयार्थः निपातनात्। अतः पूर्वतनैः नूतनैः च इत्यर्थो भवति। अग्निस्तुतौ कारणं प्रतिपादयितुं मन्त्रोऽयमुच्यते। यतो हि अयमग्निः पूर्वतनैः ऋत्विग्भिः स्तुत्यः, नूतनैरपि स्तुत्यः। यावान् कश्चिद् ऋषिः, तेन सर्वेण स्तोतव्य इति। अयमेव हेतुः यदहमग्निमीडे। इह समग्रे जगति स एवाग्निः देवान् यज्ञेषु आह्वयति, नान्यः कश्चिदपि। सायणाचार्य आह –"अग्निः पूर्वेभिः पुरातनैः भृग्वङ्गिरःप्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यः। अपि च नूतनैः उत इदानीन्तनैरपि अस्माभिः स्तुत्यः। सोऽग्निः स्तुतः सन् इह यज्ञे देवान् हविर्भुजः आ वक्षति आवहतु इत्यर्थः"[22] इति।पूर्वैः इत्यस्य वैदिकं रूपं पूर्वेभिः इति। ईड्-धातोः ण्यत्-प्रत्यये प्रथमैकवचने ईड्यः इति रूपम्। देवशब्दस्य द्वितीयाबहुवचने देवाँ इति रूपम्। पदान्ते स्थितात् नकारात्पूर्वम् आकारः किञ्च परं यः कोऽपि स्वरः तिष्ठति चेत् नकारस्य लोपो भवति। अपि तु पूर्ववर्णस्य अनुनासिकादेशो भवति। वह्-धातोः लृटि स्यप्रत्यये छन्दसि लोपे वक्षति इति रूपम्।

वैदिकदिशा यज्ञ एव श्रेष्ठतमं वैदिकं कर्म।यद्यपि परवर्तिनि काले यज्ञशब्दो व्यापकार्थपरः प्रयुञ्जानो दृश्यते, तथापि यज्ञ इत्युच्यमाने सति अग्निहोत्ररूपार्थः झटिति गम्यते। अयमेवाग्निः होमनिष्पादकः क्रान्तप्रज्ञोऽनृतरहितो विविधकीर्तियुक्त इति कीर्तितः। तथाहि आम्नायते –

"अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत्॥"[23] इति।

अस्मादग्नेः सकाशाद् यजमानः सर्वमभिलषितमासादयति। सर्वोपरि स यजमानस्य पिता भ्राता आत्मीयश्च भवति। तदाम्नातम् –"अग्निं मन्ये पितरमग्निमपिमग्निं भ्रातरं सदमित् सस्वायम्"[24] इति। अपि चोक्तम् –

"स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥"[25] इति।

तथा देवानपि यज्ञस्थलमावहति। अत एव स देवैः दूतत्वेन, मनुष्यैः च हवेर्वाहकत्वेन नियोजितः। यतोऽग्नौ हि यागो निष्पाद्यते, ततः स यज्ञस्य ऋत्विक्, विप्रः पुरोहित इत्यभिधीयते। एवं क्वचिद् अन्यत्र होता, अध्वर्युः, ब्राह्मणः – इत्यादिभिरभिधाभिः सोऽभिहितः। अग्नेः सर्वज्ञत्वमपि कीर्तितं, यतः स यज्ञविषयकं सर्वं वेत्ति। ततो जातवेदा इति तस्य संज्ञा। तदुपासकेषु स वररूपेण पुत्रवित्तादिकं वर्षति। देवान्तरापेक्षयाग्निरधिकतया मनुष्यजीवनं सम्बध्नाति। अग्निरेव केवला देवता, या स्थूलचक्षुषा नृणां प्रत्यक्षीभूता भवति। अत एव स पृथिवीस्थानदेवेषु अग्रतो गण्यते। स एव केवलं गृहपतिरित्युच्यते। उच्यते यत् सोऽतिथिरूपेण यजमानानां गृहाद् गृहान्तरं व्रजति। स स्वयममरः सन् मरणधर्माणां गृहेषु आश्रयं स्वीकरोति।

निरुक्तकारस्य यास्कस्य मतानुसारं वेदेषु अग्निरेव एको देवः। स एव इन्द्रवरुणादिनाम्ना बहुभिः प्रकारैः वर्ण्यते। तथाह्याम्नातम् –"त्वमग्र इन्द्रो वृषभः...त्वं विष्णुः...त्वमग्रे राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि" इति। "अग्निः सर्वाः देवताः"[26] इति मन्त्रांशेनाग्नेः सर्वदेवमयत्वं प्रतिपादितम्। अग्निसूक्ते ह्युच्यते –
"अग्निना रयिमश्नवत्पोषमेव दिवेदेवे। यशसं वीरवत्तमम्॥"[27] इति।
मन्त्रेणानेन अग्नेः वरवर्षणमुक्तम्। अस्मिन् प्रसङ्गे "आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्"[28] इति भणितिरपि अनुसन्धेया। अग्नेः दैत्यविनाशकीर्तिरपि क्वचित् कीर्त्यते। म्याक्डोनल्-महोदयस्य मतानुसारम् इन्दो-इराणीयमानवानां मध्ये बहुकालपूर्वत अग्निपूजायाः प्रचलनमासीत्। तन्मते इतालीदेशीयाः ग्रीसदेशीयाश्च अग्नावेव विविधान् देवान् उद्दिश्य होमान् अकुर्वन्। एवमग्निः बहुप्रसिद्ध इति ज्ञायते।

**उपसंहारः**

अग्निः खलु अस्माकं प्रत्यक्षीभूतः। वैदिकमन्त्रेष्वपि अग्निरग्रगण्य एव। विविधब्राह्मणैः अग्नेः प्राथम्यं प्रमाणितं वर्तते। मानवजीवनेन सह दृढतयाग्नेः सम्बन्धोऽस्ति। ऋग्वेदस्याग्निसूक्ते अग्नेः स्तुतिः सम्यग् वर्णितास्ति। अत्र अग्निशब्दविषये विचारोऽस्ति। भाष्यकारः श्रीसायणाचार्यः सायणभाष्ये अग्निशब्दस्य निर्वचनं विविधाचार्याणां मतानुसारेण व्याख्यातवान्। किञ्च व्याकरणप्रक्रियापि तत्र कथं भवतीति तेन प्रतिपादितम्। यास्कोऽपि अग्निशब्दस्य बहुधा निर्वचनं दर्शयति। सर्वमपि सायणाचार्यः विस्तरेण व्याख्यातवान्। अन्यनिरुक्तकाराणां मतेनापि अग्निशब्दस्य तात्पर्यं कथं सिध्यति इत्युक्तम्।

ऋग्वेदस्य प्रायः द्विशतसूक्तेषु अग्नेः स्तुतिः समुपलभ्यते। सोऽग्निः कीदृशः, किमर्थं स देवानामग्रगण्यः इति सर्वमपि अत्र संक्षेपेणालोचितम्। विविधमन्त्रैः कथमग्निस्वरूपं वर्णितं, कथमग्निः नानाभिराख्याभिराख्यायितो भवति, तदुक्तमस्ति। स जातवेदा इत्युच्यते। सर्वज्ञत्वमपि तस्य सिध्यति। स यज्ञे देवतान् आह्वयति। मनुष्यैः प्रदत्तहविश्च देवान् प्रापयति। एवंविधस्वरूपविशिष्टोऽस्ति अयमग्निः। स पुत्रवित्तादिकं वररूपेण वर्षति। एवमत्र वैदिकाग्नेः स्वरूपं वर्णितमिति शम्।

**सन्दर्भाः**


1. अग्निमीळे पुरोहितम् (अग्निसूक्तम् 1)
2. निरुक्तम् (7.14)
3. ऐतरेयब्राह्मणम् (1.4)
4. ऐतरेयब्राह्मणम् (1.1)
5. तैत्तिरीयब्राह्मणम् (2.4.3.3)
6. उणादिसूत्रम् (4.490)
7. पाणिनीयसूत्रम् (7.1.58)
8. पाणिनीयसूत्रम् (6.1.162)
9. पाणिनीयसूत्रम् (3.1.3)
10. पाणिनीयसूत्रम् (6.1.158)
11. वार्त्तिकम् (6.1.158)
12. फिट्सूत्रम् (1)
13. पाणिनीयसूत्रम् (3.1.4)
14. पाणिनीयसूत्रम् (6.1.107)
15. पाणिनीयसूत्रम् (8.2.5)
16. सायणभाष्यम्
17. निरुक्तम्
18. अग्निसूक्तम् (1)

19. सामगानम्
20. ऐतरेयब्राह्मणम् (3.14)
21. अग्निसूक्तम् (3)
22. सायणभाष्यम्
23. अग्निसूक्तम् (5)
24. ऋक्संहिता
25. अग्निसूक्तम् (9)
26. ऐतरेयब्राह्मणम्
27. अग्निसूक्तम् (3)
28. पुराणम्

**परिशीलितग्रन्थतालिका**


1. शास्त्री, राकेश (सङ्कलक, व्याख्याकार)। ऋक्सूक्तकलिका (भाग – 1)। चौखम्बा ओरियन्टालिया। दिल्ली।
2. शास्त्री, रतिराम (प्रकाशक)। ऋक्सूक्त संग्रह। साहित्य भाण्डार। मेरठ।
3. चौबे, ब्रजविहारी। ऋक्सूक्तमणिमाला (संस्कृत एवं हिन्दी अनुवाद)।
4. शर्मा, उमाशङ्करः। यास्कप्रणीतं निरुक्तम्। चौखम्बा विद्याभवन। वाराणसी।
5. पाण्डेयः, गोपालदत्तः (सम्पादकः)। पाणिनिविरचिता अष्टाध्यायी। चौखम्बा सुरभारती प्रकाशन। वाराणसी।
6. सर्वज्ञभूषण। भारतीयदर्शनसार। संस्कृतगङ्गा। दारागञ्ज, प्रयाग। 21 जून, 2021(द्वितीय संस्करण)। जनवरी 2019(प्रथम संस्करण)।
7. दाहालः, आचार्यःलोकमणिः। संस्कृतसाहित्येतिहासः। चौखम्बाकृष्णदासअकादेमी। वाराणसी। 2016।
8. पंडा, गंगाधर (प्रकाशक)। संस्कृत वाङ्मय का बृहद् इतिहास। उत्तर प्रदेश संस्कृत संस्थान। लखनऊ।